संस्कृत ग्रं. नं. ~~११~~ ८

यादीक्र

संन्यास विधिः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1) १

श्रीगणेशाय नमः ॥ अथसंन्यासः । याज्ञवल्क्यः । वनाद्गृहाद्वाकृत्वेष्टिंसार्ववेदसदक्षि
णां ॥ प्राजापत्यांतदंते तानग्नीनारोप्यचात्मनि । अधीतवेदोजपकृत्पुत्रवानन्नदोग्निमान् ।
शक्त्याचयज्ञकृन्मोक्षेमनःकुर्यात्तुनान्यथा । एतदाश्रमसमुच्चयपक्षे । जाबालश्रुतौत्वे
न्योपिपक्षाउक्ताः । यदिवेतरथाब्रह्मचर्यादेवप्रव्रजेद्गृहाद्वावनाद्वा । अथपुनरव्रतीवा
व्रतीवास्नातकोवास्नातकोवात्सन्नाग्निकोवायदहरेवविरजेत्तदहरेवप्रव्रजेदिति । अं
गिराः । प्रव्रजेद्ब्रह्मचर्याद्वा प्रव्रजेच्चगृहादपि । वनाद्वाप्रव्रजेद्विद्वानातुरोवाथदुःखितः ॥
आतुरोमुमूर्षुः । दुःखितश्चोरव्याघ्रादिभीतः । भारते । आतुराणांचसंन्यासेनविधिर्नैव
चक्रिया । प्रैषमात्रंसमुच्चार्यसंन्यासंतत्रपूरयेत् । जाबालश्रुतावपि । यद्यातुरस्यान्मन
सावाचावासंन्यसेदिति । अत्रविप्रस्यैवाधिकारः । ब्राह्मणाःप्रव्रजंतीतिजाबालश्रुतेः । आ
त्मन्यग्नीन्समारोप्यब्राह्मणःप्रव्रजेद्गृहादितिमनूक्तेश्चविज्ञानेश्वरादयः । वृद्धयाज्ञवल्क्यो रि
पि । चत्वारोब्राह्मणस्योक्ताआश्रमाःश्रुतिचोदिताः । क्षत्रियस्यत्रयःप्रोक्ताद्वावेकोवैश्यशू
द्रयोरिति । माधवस्तु । ब्राह्मणःक्षत्रियोवाथवैश्योवाप्रव्रजेद्गृहादितिकौर्मायुक्तेर्वर्णत्र

१ यस्याप्यधिकारः। पूर्ववाक्यं तु काषायदंडादिनिषेधार्थं। मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणं।
(2) राजन्यवैश्ययोर्नेति दत्तात्रेयमुनेर्वचनादिति बोधायनोक्तेरिति पक्षांतरमाहोतत्वेतु। कुटीचका
दिपरमेतदिति। योपि संन्यासंपलपैतृकमिति कलौ निषेधः। सोपि त्रिदंडादिपर इत्युक्तं प्राक्।
स च संन्यासः चतुर्धेत्याह हारीतः। कुटीचको बहूदको हंसश्चैवं तृतीयकः। चतुर्थः परमो हंसो
यो यः पश्चात्स उत्तमः। आद्यः पुत्रादिना कुटीं कारयित्वा तत्र गृहे वा वसन् काषायवासाः शि
खोपवीती त्रिदंडवान् बंधुषु स्वगृहे वा भुंजान आत्मज्ञो भवेत्। एतदत्यंताशक्तपरं। द्वितीय
स्तु बंधून् हित्वा सप्तागाराणि भैक्ष्यं चरन् पूर्वोक्तविशेषः स्यात्। हंसस्तु पूर्वोक्तवेषोप्येकदंडः।
एकं तु वैणवं दंडं धारयेन्नित्यमादरादिति स्कांदात्। त्रिपुरापि। यज्ञोपवीतं दंडं च वस्त्रं जंतुनिवा
रणं। तावान् परिग्रहः प्रोक्तो नान्यो हंसपरिग्रहः। चतुर्थोपि स्कांदे। परमं हंसास्त्रिदंडं च रज्जुं गो
वालनिर्मितां। शिखां यज्ञोपवीतं च नित्यकर्म परित्यजेत्। अयमप्येकदंड एव। यत्तु। शिखोपवीता
दित्यागनिषेधास्ते कुटीचकादिपराः। यत्तु मेधातिथिः। यावन्नस्युस्त्रयो दंडास्तावद्देकेन वर्त्तये २
दिति। तदपि तत्परमेव। यच्चात्रिः। चतुर्थाभिक्षवः प्रोक्ताः सर्वे चैव त्रिदंडिनः इति। तदाग्दंडादिपरं न य

(2A)

ष्टिपरोवाग्दंडोथमनोदंडःकर्मदंडस्तथैवच।यस्यैतेनियतादंडाःसत्रिदंडी।तिचोच्यतेइतिमनूक्तेः।
तस्मात्परमहंसस्यैकदंडएव।सोप्यविदुषः।विदुषस्तुसोपिनास्ति।नदंडंनशिखांनाछादनंचरतिचरम
हंसइतिमहोपनिषद्युक्तेः।ज्ञानमेवास्यदंडइतिवाक्यशेषाच्च।यत्तुयमः।काष्ठदंडधृतोयेनसर्वाशीज्ञान
वर्जितः।सयातिनरकान्घोरान्महारौरवसंज्ञितानिति।तद्वैराग्यंविनाजीवनार्थसंन्यासपरं।ए
२ कदंडंसमाश्रित्यजीवंतिबहवोनराः।नरकेरौरवेघोरेकर्मत्यागात्पतंतितेइतिस्मृतेः।यच्चाश्वमेधि
के।एकदंडीत्रिदंडीवाशिखीवामुंडीतएववा।काषायमात्रसारोपियतिःपूज्योयुधिष्ठिरेति।तस्यापिपू
र्वोक्तिव्यवस्थाज्ञेया।अथतद्विधिः।बोधायनः।कृत्वाश्राद्धानिसर्वाणिपित्रादिभ्योष्टकांपृथक्।वापयि
त्वाचकेशादीन्मार्जयेन्मातृकाक्रमाः।सर्वाणीतिस्वस्यनवश्राद्धषोडशश्राद्धादिकृत्वेत्यर्थः।स्मृत्यर्थ
सारेपि।एकोद्दिष्टविधानेनकुर्याच्छ्राद्धानिषोडश।अग्निमान्पार्वणेनैवविधिनानिर्वपेत्स्वयमितिका
त्यायनः।कृच्छ्रान्स्तुचतुरश्चतुरःकृत्वापावनार्थमनाश्रमी।आश्रमस्त्वितमहत्कृच्छ्रंतेनासोयोग्यतांव्रजेत्।
बोधायनः।सदैवमार्षिकंदिव्यंपित्र्यंमातृकमानुषे।भौतिकंचात्मनश्चांतेअष्टौश्राद्धानिनिर्वपेत्।अत्र
क्रममाहहेमाहेमाद्रौशौनकः।देवश्राद्धेब्रह्मविष्णुमहेश्वरादेवताः।आर्षेदेवर्षिब्रह्मर्षिक्षत्रर्षयः।

२ देवर्षिक्षत्रर्षिमनुष्यर्षयोवामरीच्यादिऋषयइतिसंन्यासपद्धतौतन्निर्णयं।दिव्येवसुरुद्रादित्याः।
(3) मानुषेसनकसनंदनसनातनाः।भूतश्राद्धेपृथिव्यादिभूतानिक्षुरादिकरणादिचतुर्विधोभूतग्रा
मश्चेतितिस्रः।पित्र्येपित्रादित्रयोमातामहाश्च।मातृकेमात्रादयस्तिस्रः।आत्मश्राद्धेआत्मापितृपि
तामहोदेवताः।आत्मश्राद्धंपरमात्मदैवत्यमितिसंन्यासपद्धतौतन्निर्णयं।सर्वत्रचनांदीमुखत्वंविशे
षणंज्ञेयं।सर्वत्रापिंडदानंयुग्माविप्राः।दक्षक्रतूसत्यवसूवाविश्वेदेवौ।अन्यन्नांदीश्राद्धवदितिहेमा
द्रिः।स्मृत्यर्थसारे।केशश्मश्रुलोमनखानिवापयित्वोपकल्पयेत्।दंडंजलपवित्रंचशिक्यंपा
त्रंकमंडलुं।आसनंकौपीनमाच्छादनंकंथांपादुकेइतिदशोपस्करंवा।एतच्चपूर्वेद्युर्नांदीश्राद्धंकृत्वा
परेद्युःपुण्याहवाचनंकृत्वाकार्यमितिशौनकः।बोधायनः।त्रीन्दंडानंगुलस्थूलान्वैणवा
न्मूर्धसंमितान्।एकादशनवद्वित्रिचतुःसप्तान्यपर्वकान्।वेष्टितान्कृष्णगोवालरज्ज्वाच
तुरंगुलान्।एकोवातीदृशोदंडोगोवालसूत्रोभवेत्।अनाग्निरग्निमुत्पाद्याधानंनित्येनविधि २
नाततःपृष्ठोदिविविधिनानेत्यर्थः।स्वाग्नावेवाग्निमान्कुर्यादपवर्गोक्तिमादितः।आज्यपयोद
ध्यात्मत्रिवृद्वाजलमेववा।ॐभूरित्यादिनाप्राश्यरात्रिंसोपवसेत्ततः।अथादित्यस्यास्तमया

(3A)

तूर्वमग्नीन्विहृत्यसः।आज्यमग्नौगार्हपत्येसंस्कृत्येतेनचस्रुवा।पूर्णयाहवनीयेतुजुहुयात्म
णवेनतत्।ब्रह्मान्वाधानमेतत्स्यात्दग्निहोत्रेकृतेततः।संस्तीर्यगार्हपत्यस्यगर्भान्नुत्तरतोत्रनु।
२ पात्राण्यासाद्यदर्भेषुब्रह्मायतनएवतु।ज्ञात्वयाद्रात्रिमेतांतु।यावद्धोमोमूहूर्तकः।अग्निहोत्रं
स्वकालेतुकृत्वाप्रातस्तनंततः।इष्टिंवैश्वानरींकुर्यात्प्राजापत्यमथापिवा।जाबालश्रुतौ।तद्देके
प्राजापत्यामेवेष्टिंकुर्वंति।तदुतथानकुर्यादाग्नेयीमेवकुर्यात्स्थात्रेधातवोयामेवकुर्यादित्युक्तं।ते
नात्रविकल्पः।अत्राहुः।त्रेताग्नेःप्राजापत्या।तद्दाक्षयतोबहून्।निनिबहुत्वश्रुतेः।एकाग्नेस्त्वाग्नेयीति
अनाहिताग्नेरिष्टिस्थानेवैश्वानरआग्नेयोवा[illegible]रुरितिमाधवः।कात्यायनः।आत्मन्यग्नीन्समारो
प्यवेदिमध्यस्थितोहरिं।ध्यात्वाहृदित्वनुज्ञातोगुरुणाप्रेषमीरयेत्।कापिलः।त्रिविधवक्षेषमुक्त्वाथ
त्रिरूपांकुत्रिरुच्चकैः।अभयंसर्वभूतेभ्योमत्तःस्वाहेत्यपोभुवि।निनायदंडादीन्क्याद्गृहीत्वाथबहि
र्व्रजेत्।बोधायनः।समेत्यादिनाग्नेनदेवाःपवित्रकं।यदस्यपारेरशिक्यंतुपात्रव्याहृतीभिस्तथा।सुवा
सुवासाःकौपीनंगृहीत्वाबांधवांस्त्यजेत्।।अथक्रमः।।तत्रसन्यासेधिकारासिध्यर्थंस्वस्यनवश्राद्ध
षोडशश्राद्धसपिंडनानि[illegible]साग्निःपार्वणाव्यनाग्निकस्त्वेकोद्दिष्टविधिनाकृत्वानाश्रमीचेत्कृच्छ्रवत्तुष्ट

Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan

(५)

यमन्यस्तु तप्तकृच्छ्रं कृत्वोदगयने एकादश्यां द्वादश्यां वा साग्निरमावास्यायां पौर्णमास्यां चतुर्दश्यां वा । य
थापूर्वेणिप्राजापत्यास्यात् । तत्र देशकालौ स्मृत्वा परमहंसादिसन्यासग्रहणं करिष्य इति संकल्प्य ग
णेशं संपूज्य पुण्याहं वाचयित्वा मातृकापूजां वृद्धिश्राद्धं च कृत्वा तन्मयासायंगौपासनं समिध्याहिताग्नि
स्तु गार्हपत्यं विधुरोऽग्निहोत्री तु त्रिकाण्डमण्डनोक्तविधिना कृत्वा पत्न्या सह पवमानेष्टिं तं पूर्णाहुत्यंतं वाधानं कुर्या
त् । ब्रह्मचारी चेल्लौकिके विधुरश्चेषा ऊलिभिः प्रणवेनाग्निमादायाग्निकृषसामोत्यानीयपृष्ठे दधीति
निधाय तेनैव समिध्य तत्सवितुः तां सवितुर्विश्वानि नः इति तिसृभिः समिधोभ्याद्ध्यात् । एवमग्नौ सिध्ये
कक्षोपस्थवर्जं वपनं कृत्वा पयो दधि घृतमाज्यं पयो वा । ॐ भूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यमिति
प्राश्याचम्य पुनरादाय । ॐ भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहीति द्वितीयं । ॐ स्वः सावित्रीं प्रवि
शामि धियो यो नः प्रचोदयादिति तृतीयं । समस्तेन । ॐ भूर्भुवस्स्वः सावित्रीं प्रविशामि तत्सवितुर्व ।
यात् इति सन्यासपद्धतौ तु त्रिवृदसीति प्रथमं प्रवृद्दसीति द्वितीयं । विवृद्दसीति तृतीयं । प्राश्यापः पु
नंत्विति जलं प्राश्य सावित्री प्रविशोक्तः । तत आहवनीयं विहृत्य ब्राह्मणमुपवेश्याज्यसंस्कृत्य चतुर्हो २
तृग्रहांल्लासाभित्पूर्वीमो स्वाहा परमात्मने इदमिति कृत्वोपवसेत् । ततः सायंहोमं वैश्वदेवं कृत्वाग्निक
टकुशानास्तीर्य दण्डादीन् निदध्यात् पंचवासा ब्राह्मासने कृष्णाजिनोपविष्टो रात्रौ जागरं कृत्वा प्रातर्होमानंतरं

प्राजापत्यांवैश्वानरींवारुणींकृत्विग्भ्यः सर्वस्वंब्रह्मणेचमधुपूर्णंतैजसपात्रंदत्वादारुपा
पात्राण्यश्ममन्मयानिचजलेक्षिपेत्।कृष्णाजिनंदत्वाददीत।अनाहिताग्निस्तुवैश्वानरमा
ग्नेयंवाचरुंहुत्वापात्राण्यग्नौक्षिप्त्वाभूर्भुवःस्वरित्यपःस्पृष्ट्वातरत्समंदीतिजप्त्वाविप्रान्संभो
ज्यपुण्याहंवाचयित्वात्रवापनंकृत्वाहेमरूप्यकुशजलैःस्नात्वापुरुषायचरुंकृत्वाप्राणायस्वा
हेतिपंचाज्याहुतीर्हुत्वापुरुषसूक्तेनप्रत्यृचमाज्यंचरुंचजुहुयात्॥अत्रविरजाहोमंकेचिदा
हुः॥यथोक्तंजिज्ञाचगीतासु।जुहुयाद्विरजामंत्रैःप्राणापानादिभिस्ततः॥अनुवाकांतमेका
ग्रःसमिदाज्यचरून्पृथक्॥आत्मन्यग्नीन्समारोप्यध्यात्वाग्नेरितिमंत्रतः॥भस्मादायाग्निरि
त्याद्यैःविमृज्यांगानिसंस्पृशेत्॥पापैर्विमुच्यतेसत्यंमुच्यतेचनसंशयः॥यथा॥प्राणापानव्या
नोदानसमानामेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासं स्वाहा।सर्वत्रलिंगोक्तदेवता
भ्यःइदमितित्यागः।वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुध्याकूतिःसंकल्पामेशुध्यं
तांज्योतिरहंविरजाविपाप्माभूयासं स्वाहा।त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवो
स्थीनिमेशुध्यंतांज्योतिरहंविरजाविपाप्माभूयासं०॥शिरःपाणिपादपार्श्वपृष्ठोरूद
रजंघाशिश्नोपस्थपायवोमेशुध्यंतांज्योतिः॥शब्दस्पर्शरूपरसगंधामेशुध्यंतांज्योतिः
मनोवाक्कायकर्माणिमेशुध्यंतांज्योतिः।अव्यक्तभावैरहंकारैर्ज्योतिरहं०।आत्मामेशुध्यं
तांज्योतिः।अंतरात्मामेशुध्यंतांज्योतिः॥परमात्मामेशुध्यंतांज्योतिरहं०।अन्नमयप्राण

४ मयमनोमयविज्ञानमयमानंदमयमात्मा मे शुध्यंतां ज्योतिरहं ० क्षुधे स्वाहा ० क्षुत्पिपासाय ० वि
विट्यै स्वाहा ० ऋग्विधानाय ० कषोत्काय ० क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीं नाशयाम्यहं ० अ
(5) भूतिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मानं स्वाहेति । ततः स्विष्टकृदादि कृत्वा ब्रह्मणे हिर
ण्यमात्रं ज्यपात्रं धेनुं च दत्वा संमासिंचांचित्यैत्तिष्ठत । अत्र केचिदनग्नेः सावित्रीप्रवेशं पूर्णा
हुतिं चाकुः ॥ ततोयाति ५ अग्नेय यज्ञियातनूः रिति त्राम्मि ककेकं जिघ्र सात्मन्यग्नीत्समा
रोप्य गुरवे सर्वस्वं दत्वा यो ब्राह्मणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ॥ तं ह देवमात्मबुद्धिप्रका
शं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ इत्युपस्थाय दक्षिणं जान्वाच्य पादावुपसंगृह्याधीहि भगवो ब्रह्मे
ति वदेत् । ततो गुरुरात्मानं ब्रह्मरूपं ध्यात्वा शंखं दात्र्या प्रणवेरभिमंत्र्य तेन शिष्यमभिषिच्य
शंनो मित्र इति शांतिं पठित्वा तच्छिरसि हस्तं दत्वा पुरुषसूक्तं जप्त्वा । मम व्रते हृदयं ते दधामी
ति च जप्त्वा दक्षकर्णे प्रणवार्थमनुसंधत्त दक्षिणकर्णे प्रणवमुपदिश्य तदर्थं पंचीकरणाद्य
बोध्य अयमात्मा ब्रह्म तत्त्वमसि प्रज्ञानं ब्रह्मेत्याद्युपदिशेत् । तदर्थं विवदेत् ॥ ० तातो नामद
द्यात् । ततः शिष्यस्तेनोपदिष्टो हरिं स्मरन्नूर्ध्वबाहुस्तिष्ठन्देवान्साक्षिणः कृत्वा । ॐ
भूर्भुवःस्वः संन्यस्तं मयेति त्रिरुपांशु त्रिरुच्चैरुक्त्वा जलसमीपं गत्वा स्नात्वा अभयं सर्व
भूतेभ्यो मत्तः स्वाहेति त्रिरंजलिं क्षिप्त्वा पूर्ववाससा वा इति काषायं कौपीनं वासश्च परि ४

(5A)

धायसखामा गोपायेति मुख्यं वै एवं पालाशं बैल्वं मौदुंबरं वा दंडं गृह्णीयात्॥ अत्र पुत्रकामो
गृहस्थः त्रीं खपुरुषसूक्तेन दंडं माभिषिच्य दद्यादित्याचारः॥ ततः त्रिशिखामुत्साद्य ॐ भूः स्वाहे
५ त्यग्नौ जुहुयात् तथैवैपवीतं कृत्वाप्येनेद वाः पवित्रे एति जलपवित्रं यदस्यपारइति त्रि
बंसा वित्र्याक मंडलुं सव्याहृतिभि र्भोजनपात्रमिदं विष्णुरित्यासनं हंसो वा गृहीत्वा
ॐ भूस्तर्पयामीति व्यस्तसमस्ताभिर्महर्नमिरितितर्पयित्वा ॐ भूः स्वधां भुवः स्वधां भू
र्भुवः स्वर्महर्नमः स्वधामिति पितृस्तर्पयित्वोदुत्यं चित्रं तच्चक्षुः हंसः शुचिषन्नमो मि
त्रस्येति स्नात्वा सुरमतीभिरापोहिष्ठेति हिरण्यवर्णाः शुचयः पावमानीभिर्व्याहृतिभिश्च मा
र्जयित्वाष्टोत्तरशतमघमर्षणं प्राणायामांश्च कृत्वा भूर्भुवः स्वरिति पठित्वा नमः सवित्र इ
ति सूर्यमुपस्थाय पुनः स्नात्वा जंघे प्रक्षाल्य पिबेत्। ॐ मिति ब्रह्मो मित्ती दं सर्वं ॐ मि
ति ब्रह्म वा एष ज्योतिर्य एष तपति वेदा मे वै ते य एष वेद यद्वचनमस्तीति जपित्वाष्टसह
स्रं गायत्रीं जपेदिति। ॥अथ यतिधर्माः। बोधायनमतः॥ त्रीन् दंडान् अंगुलस्थू
लान् वैणवान् मूर्ध्नि संमितान्॥ एकादशान् वा द्वित्रिन्चकः सप्तान्यपर्
विकान् वेष्टितान् कृष्णगोवालरज्ज्वा तु चतुरंगुलान्॥ एको वा
तास्त्रो दंडे गोवालस दशोभवेत ॥८८

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai — joint property

(6)

५

अथयातधर्माः। प्रातरुत्थायब्रह्मणस्पतेइत्तिजपित्वादंडादीनिमदंचनिधायमूत्र
पुरीषयोर्गृहस्थगृहस्थचतुर्गुणमाशौचंकृत्वाचम्यपर्वद्वादशीवर्जंप्रणवेनदंतधाव
नंकृत्वातेनैवमृदाबाहिःकटिंप्रक्षाल्यजलतर्पणवर्जंस्नात्वापुनर्जंघेप्रक्षाल्यवस्त्रा
दीनिगृहीत्वामार्जनांतंकृत्वाकेशवादिनामांतनामभिस्तर्पयित्वाॐभूस्तर्पयामीत्या
दिव्यस्तसमस्ताभिर्व्याहृतिभिर्महर्जनस्तर्पयामीतितर्पयेत्॥ॐभूःस्वाहाशांतैः
स्वधाशांतैश्चैभिश्चपुनस्तर्पयेदितिकेचित्॥ततआत्मांजलिनाब्रणचेनज
लमादायव्याहृतीभिरुद्धृत्यगायत्र्याभिः क्षिप्त्वागायत्रीजपेत्॥उदितसूर्यप्र
णवेनव्याहृतिभिर्वर्धयित्रिदत्वामित्रस्यचर्षणीत्यादिसूक्तसौराभिरिदंवि
ष्णुस्त्रिर्देवीब्रह्मजज्ञानमितित्रिचोपस्थायसर्वभूतेभ्योनमइतिप्रादक्षिणमा
वर्ततितलोनत्वा। आदित्यायविद्महेसहस्राक्षायधीमहि। तन्नःसूर्यःप्रचोदया
दितित्रिर्जपेत्॥एवंत्रिकालंविष्णुपूजांब्रह्मयज्ञंचकुर्यात्॥अथभिक्षाः। विधूमे
सन्नमुसलेव्यंगारेषुकवचुने। कालेपराह्णेभूयिष्ठेनित्यभिक्षांयतिश्चरेदितिस्मृ
तेकालेउदयमितिनिवर्तस्यः [illegible] रादित्यमुपस्थायतेनैवंच ध्यात्वाआकृत्नेतिप्र

७

(7) दक्षिणं कृत्वा ये ते पंथान इति जप्त्वा योसौ विष्णुराख्य आदित्ये पुरुषोंतर्हृदि स्थितः। सो
हं नारायणो देव इति ध्यात्वा प्रणमेत्ततः॥ त्रिदंडं दक्षिणे स्कंधे ततः संधाय वल्कुना॥
पात्रं वामकरे क्षिप्त्वा त्वलेषयेद्दक्षिणेन चितिवौधायनोक्त दिशा त्रीन्पंच सप्त वा गृहा
न्गत्वा भवत्पूर्वं भिक्षां याचितो पूर्णमसि पूर्णमिमं भूया इत्यागत्य शुचिरन्नं प्रोक्ष्य ॐ
भूःस्वधा नम इत्यादि व्यस्तसमस्तव्याहृतिभिः सूर्यादिदेवेभ्यो भूतेभ्यश्च भूमौ क्षि
प्त्वा भुक्त्वा प्रणवेन षोडश प्राणायामान्कुर्यादिति संक्षेपः। गौतमव्याख्यायां भिक्षुः
यतिहस्ते जलं दत्वा भैक्षं दद्यात्पुनर्जलं॥ भैक्षं पर्वतं स्यात्तज्जलं सागरोपमं। अत्र
सर्वत्र मूलं माधवापरार्कमदनरत्नस्मृत्यर्थसारादौ ज्ञेयं। कण्वः। एकरात्रं वसेद्ग्रा
मे नगरे पंचरात्रकं॥ वर्षाभ्योन्यत्र वर्षासु मासांस्तु चतुरो वसेत्॥ जाबालश्रुतौ॥
शून्यागारे देवगृहे तृणकुटी वल्मीक वृक्षमूल कुलालशालाग्निहोत्र गृह नदीपु
लिन गिरिकुहर निर्झर स्थंडिलेष्वनिकेतन इति। मात्स्ये। अष्टौ मासान्विहारः स्या
द्यतीनां संयतात्मनां॥ एकत्र चतुरो मासान्वार्षिकान्निवसेत्पुनः ७॥ अविमुक्ते प्रवि
ष्टानां विहारस्तु न विद्यते॥ अत्रिः॥ भिक्षाटनं जपं स्नानं ध्यानं शौचं सुरार्चनं॥ कर्त्त
व्यानि षडेतानि सर्वथा नृपदंडवत्॥ मंचकं शुक्लवस्त्रं च स्त्रीकथालौल्यमेव च॥ ७

९

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(7A)

दिवास्वापं च यानं यतीनां पतनानि षट्॥ आसनं पात्रलोभश्च संचयः शिष्यसंग्रहः। दि
वास्वापो वृथाजल्पो यतेर्बंधकराणि षट्। दक्षः। नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथंच
न॥ याज्ञवल्क्यः। यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च॥ मदनरत्ने त्रिः। पित्रर्थं कल्पि
तं पूर्वमन्नं देयादिषु द्विषादिकारणात्॥ वर्जयेत्तादृशीं भिक्षां परबाधाकरीं तथा॥ बृहस्पतिः
२ न तीर्थवासी नित्यं स्यान्नोपवासपरो यतिः॥ न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवे
त्॥ एतद्वेदार्थभिन्नपरं। अत्रिः। स्नानं सुरार्चनं ध्यानं प्राणायामो बलिः स्तुतिः॥ भिक्षाश
नं तपः संध्या त्यागः कर्मफलस्य च॥ एते यतिधर्माः स्युरित्यर्थः। अन्येपि माधवीयमिताक्षरा
दौ ज्ञेयाः। यतिधर्मसमुच्चये॥ न स्नानमाचरेद्भिक्षुः पुत्रादिनिधने श्रुते॥ पितृमातृक्ष
यं श्रुत्वा स्नात्वा शुध्यति सांबरः॥ अथ यतिसंस्कारः॥ स्मृत्यर्थसारे। सर्वसंगनिवृत्तस्य
ध्यानयोगरतस्य च॥ न तस्य दहनं कार्यं नाशौचं नोदकक्रिया॥ तथा। कुटीचकं तु प्रदहे
त्पूरयेच्च बहूदकं। हंसो जले तु निक्षेप्यः परमहंसं प्रपूरयेत्॥ पलाशशाखे नदीतीरेन्यत्र वा
गंधपुष्पालंकृतं शवं वाद्यघोषेण नीत्वा दंडमात्रं व्याहृतिभिः त्रिः प्रोक्ष्य दर्भानास्तीर्य
नवघटं पंचरत्नोदकं क्षिप्त्वा नारायणः परं ब्रह्मेत्यभिमंत्र्य तेनैव संस्नाप्य अष्टाक्षरेण
वस्त्रगंधपुष्पधूपदीपान्दत्वा विष्णो हव्यं रक्षस्वेति शवं गर्ते निधापयेद् विष्णुरिति

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the ... Mumbai

(४)

दक्षिणहस्ते दंडं यदस्य पारे रज इति सव्ये शिक्यं येन देवाः पवित्रेणेति मुखे जलपवित्रं सावित्र्या
दरे पात्रं भूमिः भूम्नेति गुह्ये कमंडलुं निधाय चित्तिस्रुगिति दशाहोरात्राभिरभिमंत्रयेदि
ति विश्वादर्शटीकायां स्मृत्यर्थसारे च। बहुधो न कस्य। यतिं पुरुषसूक्तेन स्नापयित्वा वटं ततः॥
प्रणवेनाष्टवारं प्रोक्षयेदथ सर्वतः॥ विष्णो हव्यं रक्षस्वेति यजुषा प्रणवेन च॥ गर्ते प्रितं वि
निक्षिप्य चेदं विष्णुर्विचक्रमे॥ इति मंत्रेण दंडं दद्याद्दक्षिणहस्तके॥ मूर्धनि भूर्भुवः स्वश्चे
त्युक्ताशंखेन भेदयेत्॥ गर्त्तं पुरुषसूक्तेन लवणेन प्रपूरयेत्॥ सृगालश्वादिरक्षार्थं
सम्यग्गर्त्तं प्रपूरयेदिति। कुटीचकस्य तु दाहः कार्यः॥ यथा सर्वं प्राग्वत्कृत्वाग्निं प्रज्वाल्य सा
ग्नेर्दक्षिणकरे उपावरोहेत्यवरोह्य निर्मथ्य वा गर्त्ते चितिं कृत्वाग्निनाग्निः समिध्यते इत्य
ग्निं दत्वा सावित्र्या प्रणवेन वा दहेत्। ततोऽष्टशतं प्रणवं नारायणः परं ब्रह्मेति च जप्त्वा सशिराः
प्रणवव्याहृत्या गायत्र्या तस्मै॥ इ स्मास्थि तीर्थे स्नात्वा नाशुचिः॥ न स्यान्यदोषोऽपि दैहिकं
॥ त्रिदंडग्रहणादेव प्रेतत्वं नैव जायते॥ [illegible]पुरान्सस्मृतेः। एकादशाह्नि पार्वणं तदपि त्रि
दंडिनः हंसपरमहंसादीनां पार्वणादिकमपि न कार्यमिति त्रिस्थलीपातिः॥ श्राद्धचिंता
मणौ दत्तात्रेयः॥ एकोद्दिष्टं जलं पिंडं आशौचं प्रेतसत्क्रियां॥ न कुर्यात्पार्वणादन्यद्ब्र
ह्मीभूताय भिक्षवे॥ प्रेतक्रियायैकोद्दिष्टनिषेधसिद्धे पुनस्तद्ग्रहणमादिकपरं। तेनत
त्सार्वत्रिकमेव। त्रिदंडिद्वादशे नारायणबलिः। तद्विधिरन्यत्र विशेषः प्रागुक्त
इत्यलं बहुना। श्री।

नां

॥७॥ ७ २

Joint Project of the Rajwade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com